दिनाङ्कः 30.06.2026

प्रातः - 06:55

<u>राष्ट्रपति-रक्षा अलंकरण पुरस्काराः</u>

नवदिल्ल्यां राष्ट्रपतिभवने ह्यः षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य द्वितीय-रक्षा-अलंकरण-समारोहे राष्ट्रपतिः द्रौपदी-मुर्मु-वर्या शौर्यपुरस्कारान् प्रदत्तवती। शौर्य-पुरस्काराः रक्षासैन्य-बालानां, केन्द्रीय-सशस्त्र-आरक्षक-बलानां, राज्य-केन्द्र-शासित-आरक्षकाणां कार्मिकाणां च कृते प्रदीयन्ते। एते पुरस्काराः सशस्त्र-बलानां, केन्द्रीय-सशस्त्र-आरक्षि-बलानां, अन्य-सुरक्षा-अभिकरणानां च कार्मिकाणां असाधारण-शौर्य-कार्यान् उद्दिश्य दीयन्ते।

राष्ट्रपतिना समारोहे सप्त सर्वोत्तम युद्ध सेवापदकानि, त्रिंशत् परम विशिष्ट सेवा पदकानि, द्वादश उत्तम युद्ध सेवापदकानि, षड्पञ्चाशत् अतिविशिष्ट सेवापदकानि च वितरितानि। उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, रक्षामंत्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः, सशस्त्रसेनायाः वरिष्ठाः अधिकारिणः च अस्मिन् अवसरे उपस्थिताः आसन्। राष्ट्रपतिः मुर्मुः वर्या इतः पूर्वम् अस्मिन् मासे अष्ट दिनाङ्के राष्ट्रपतिभवने रक्षा-अलंकरण-समारोहे प्रथम-चरणस्य शौर्यपुरस्कारान् प्रदत्तवती ।

<u>प्रधानमन्त्री-सेशेल्स् - यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी ह्यः अवदत् यत् तस्य सेशेल्स्-देशस्य यात्रा महत्त्वपूर्णैः परिणामैः पूरितम् अस्ति येन भारत-सेशेल्स् देशयोः मैत्री प्रवर्धिता भविष्यति।

सामाजिकान्तर्जालीये सन्देशे प्रधानमन्त्री अवदत् यत् विगतपञ्चदशवर्षेषु उभयोः देशयोः मध्ये सम्बन्धः सुदृढविश्वासेन, संयुक्तप्रगतिना च चिह्नितः अस्ति, यदा तु अगामि पञ्चाशत् वर्षाणि नवान्वेषणेन, सुस्थिरतया, संयुक्तसमृद्ध्या च निर्धारिताः भविष्यन्ति। सः सेशेल्स्-देशस्य स्वातन्त्र्यस्य पञ्चाशततमे वर्षे राष्ट्रियदिवसस्य समारोहे भाग-ग्रहणाय हर्षं प्रकटितवान्। श्रीमोदी सेशेल्स्-देशस्य राष्ट्रपत्ये □ा. पैट्रिक् हर्मिनी इत्यस्मै, सेशेल्स-देशस्य सर्वकाराय, जनानां च स्नेहाय धन्यवादम् अददात्।

<u>सर्वकारः/ नीफ कोषः</u>

राष्ट्रिय-निवेशावसंरचना-कोषस्य नीफ इत्यस्य कृते सर्वकारस्य समग्रप्रतिबद्धता अधुना षष्ठीसहस्रकोटिरूप्यकाणि अभवत्। एतत् उपक्रमं मूलसौकर्याणां कृते, अन्येषु राष्ट्रिय-महत्त्वपूर्णेषु क्षेत्रेषु च केन्द्रस्य निवेशप्रतिबद्धतां प्रदर्शयति। केन्द्रीयमन्त्रिमण□लेन गतसप्ताहे आधारभूतसंरचना-निवेशस्य गतिं वर्धयितुं, देशे संस्थागत-मूलधनं उत्प्रेरयितुं च निधौ त्रिंशत्सहस्र-कोटि-रूप्यकाणां अतिरिक्त-निवेश-प्रतिबद्धतानुमोदिता।

<u>शिवराज - पूर्वोत्तर</u>

केन्द्रीय -कृषि-कृषक-कल्याण-मन्त्री शिवराज सिङ्घ चौहानः अद्य आरभ्य पूर्वोत्तरस्य द्विदिवसीय-यात्रायां भविष्यति। श्रीचौहानः असम-राज्यस्य गुवाहाटी-नगरे उच्च-स्तरीय-समीक्षा-सभायाः आयोजनं करिष्यति। सभायां असम-राज्यस्य समीपस्थेषु क्षेत्रेषु सस्येषु, ग्रामेषु, महत्त्वपूर्णसंरचनायां च जलप्लावस्य प्रभावस्य समीक्षा भविष्यति। वर्तमानस्य साहाय्योद्धार-कार्याणां प्रगतेः समीक्षापि भवितुं शक्नोति। असम्-राज्यस्य

**समीक्षायाः अनन्तरं, श्रीचौहानः श्वः अरुणाचलप्रदेशस्य जलप्लावितक्षेत्राणां निरीक्षणं विधाष्यति। सः जलप्लावितानां ग्रामाणां, कृषिक्षेत्राणां,**

**साहाय्योद्धार-शिबिराणां च स्थित्याः मूल्याङ्कनं कर्तुं वायुमार्गेण, भूमार्गेण च सर्वेक्षणं करिष्यति।**

**<u>अमरनाथ-यात्रायाः</u>**

**जुलाई-मासस्य तृतीय दिनाङ्कादारभ्यमाणस्य सप्त पञ्चाशत्दिवसात्मिकायाः वार्षिक-अमरनाथ-यात्रायाः प्राक्, सुरक्षा-संस्थाः पञ्जाब्-तः जम्मू-कश्मीर्-पर्यन्तं तीर्थयात्रामार्गे सज्जतां तीव्रीकृतवन्तः, मोक-ड्रिल् इत्याचरन्ति, निरीक्षण-प्रणालीं सक्रियं कुर्वन्ति, सहस्रशः तीर्थयात्रिणां सुरक्षित-गमनागमनं सुनिश्चेतुं अन्ता-संस्था-समन्वयं सुदृढं कुर्वन्ति च। जम्मू-कश्मीर्-प्रदेशे तीर्थयात्रिणां प्रथमसमूहस्य आगमनं समारब्धम् अस्ति।प्रथम-पूजायाः अवसरे, भारत-तिब्बत-सीमा-आरक्षकस्य महानिरीक्षकः I. अकुन सभरवालः पवित्रगुहायां बरारीमार्ग इत्यत्र च चिकित्सा-सहायकस्थानानां उद्घाटनम् अकरोत्।**